# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**–आचार्य (SEM-1) | **प्रश्नपत्रम्**–२ (New & Old) | **गुणाः** – ७० |
| **विषयः** – पुराणेतिहासः | **कोड**- **CC- 4.1.1.** | **समयः** – २ तः ५ |
| **दिनाङ्कः** – १५/१२/२०१८ | **सन्दर्भग्रन्थः**– महाभारतम् (राजधर्मानुशासनपर्व) | |

**॥ प्रथमान्वितिः ॥**

**प्र–१ कस्याप्येकस्य पद्यस्य ससन्दर्भं व्याख्यां कुरुत । ०५**

१. पिता गुरुर्न संदेहो वेदविद्याप्रदः प्रभुः ।
अतो भार्गव इत्युक्तं मया गोत्रं तवान्तिके ॥

२. द्व्यक्षरस्तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतम् ।
ममेति च भवेन्मृत्युर्न ममेति च शाश्वतम् ॥

**प्र–२ कस्याप्येकस्य सविस्तरेणोत्तरं लिखत । १०**

१. युधिष्ठिरस्य पार्श्वे नारदादिमहर्षिणामागमनम् एवं कर्णाभिज्ञानं शापवृत्तान्तं च ।

२. युदिष्ठिरस्य अर्जुनपार्श्वे खेदप्रकटनम् एवं च राज्यत्यागं कृत्वा वनगमनस्य प्रस्तावः ।

**॥ द्वितीयान्वितिः ॥**

**प्र–३ एकस्य पद्यस्य ससन्दर्भं व्याख्यां कुरुत । ०५**

१. दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ॥

२. सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ।
न नित्यं लभते दुःखं न नित्यं लभते सुखम् ॥

**प्र–४ एकस्य विस्तरणोत्तरं लिखत । १०**

१. युधिष्ठिरेण स्वमतस्य यथार्थं प्रतिपादनं तथा च देवस्थानमुनिना यज्ञानुष्ठानविषयकं प्रेरणादानम् ।

२. व्यासमुनिना शंखलिखितयोः कथां संश्राव्य राज्ञः सुद्युम्नः दण्डधर्मपालनं महत्त्वं वर्णयत ।

**॥ तृतीयान्वितिः ॥**

**प्र–५ एकस्य पद्यस्य ससन्दर्भं व्याख्यां कुरुत । ०५**

१. तत्रोत्तारं गतिं पार्थ प्रशंसन्ति पुराविदः ।
संतोषो वै स्वर्गतमः संतोषः परमं सुखम् ॥

२. तापसां कर्मणा चैव प्रदानेन च भारत ।
पुनाति पापं पुरुषः पुनश्चेन्न प्रवर्तते ॥

**प्र-६ एकस्य विस्तरेणोत्तरं लिखत।** **१०**

१. युधिष्ठिरस्य धनत्यागमहत्त्वं लिखित्वा अश्माऋषेः तथा जनकस्य च संवादं विवेचयत।

२. पापकर्मणां प्रायश्चित्तम् एवं च नारदपर्वतोपाख्यानं विवेचयत।

**॥ चतुर्थान्वितिः ॥**

**प्र-७ एकस्य पद्यस्य ससन्दर्भं व्याख्यां कुरुत।** **०५**

१. सुधर्मा विदुरो धौम्यो धृतराष्ट्रस्य कौरवः।
निषेदुर्ज्वलनाकारेष्वासनेषु पृथक् पृथक्॥

२. हरिं सहस्रशिरसं सहस्रचरणेक्षणम्।
सहस्रबाहुमुकुटं सहस्रवदनोज्वलम्॥

**प्र-८ एकस्य सविस्तरम् उत्तरं लिखत।** **१०**

१. युधिष्ठिरस्य राज्याभिषेकः तथा च भगवतः स्तुतिं निरूपयत।

२. भगवता परशुरामेण कृतं क्षत्रियसंहारविषयकं राज्ञः युधिष्ठिरस्य प्रश्नं विलिख्य भीष्मस्तवनं विवेचयत।

**प्र-९ दशप्रश्नानामुत्तराणि लिखत।** **१०**

१. राजधर्मानुशासनपर्व कस्य पर्वणः पर्वान्तर्गतम् आगच्छति?

२. राजधर्मानुशासनपर्वणि अभ्यासक्रमान्तर्गतं कति अध्यायाः सन्ति?

३. कर्णः ब्रह्मास्त्रविद्यां कुतः प्राप्नोति?

४. दुर्योधनः कस्य राज्यस्य कन्याम् अपहृतवान्?

५. अङ्गदेशस्य मालीनीनगर्याः राजा कः ?

६. दण्डनीतेः वर्णनं केन कृतम्?

७. युधिष्ठिरं यज्ञानुष्ठानाय कः प्रेरयति?

८. महाभारते कति पर्वाणि सन्ति?

९. पापकर्मणां प्रायश्चितं कतमेऽध्याये आगच्छति?

१०. क्षत्रियकुलस्य संहारः केन कृतः?

११. पाण्डवानां पितरौ कौ?

१२. कृच्छ्रव्रतं कृत्वा कस्मात् पापात् निवृत्तिः जायते?

१३. कस्य दानेन सर्वाणि पापानि नश्यति?

१४. अजातशत्रुः कः ?

१५. महाभारतस्य मुख्यः रसः कः ?

--००--